# श्री शांति पञ्चकम

शन्नो मित्रश्शंवरुण: । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पति: । शन्नो विष्णुरुरुक्रम: । शन्नो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु मामवतु। तद्वक्तरमवतु । अवतु माम् । अवतु वक्तारम् । ओं शांतिश्शांतिश्शांति: ॥

शन्नो मित्रश्शंवरुण: । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पति: । शन्नो विष्णुरुरुक्रम: । शन्नो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्मवादिषम । ऋतम वादिषम । सत्यम वादिषम । तन्मामावीत् । आवीन्माम् । आवीदवक्तारम् । ओं शांतिश्शांतिश्शांति: ॥

सहनाववतु । सहनौ भुनक्तु । सहवीर्यं करवाम्है । तेजस्विनावधीतमस्तु । विद्विषावहै । ओं शांतिश्शांतिश्शांति: ॥

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये ऋषिभ्यो । मंत्रकृद्भ्यो मंत्रपतिभ्यो मामामृषयो मंत्रकृतो मंत्रपतय: परादुर्माहमृषीन्मंत्रकृतो मंत्रपतींपरादां वैश्र्वदेवीं वाचमुद्यासगं शिवामदस्तांशिवामदस्तां जुष्टान् देवेभ्यश्शर्म मे द्यौश्शर्मपृथिवी शर्म विश्र्वमिदं जगत् । शर्म चंद्रश्र्च सूर्यश्र्च शर्म ब्रह्म प्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरण मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासगं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवंतु शोभायै पितरोनुमदंतु । ओं शांतिश्शांतिश्शांति: ॥

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु न: । स्वस्तिर्मानुषेभ्य: । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शञ्चतुष्पदे । ओं शांतिश्शांतिश्शांति: ॥